# संस्कृतं भारतीयसंस्कृतिश्च

**नन्दकिशोर-मिश्रः**
**प्राच्यविद्या**
**म.स. विश्वविद्यालयः-वटोदरम्**

अस्मिन् देशे अनेकानि रत्नानि सन्ति तथापि मानवजीवने यत् अत्यावश्यकमस्ति तदेव स्वीकरणीयम्। यतो हि सर्वेषां जीवने जन्मतः मृत्युपर्यन्तं यस्याधारः यस्याश्रयः जायते तदस्ति संस्कृतं संस्कृतिश्च । एतत् विना जीवनं असत्यमिति तर्हि किं नाम संस्कृतम् ? का च संस्कृतिः ?अत्रोच्यते -

संस्कृतं संस्कृतिश्च अन्योन्याश्रितः संस्कृतं विना संस्कृतिः तथा संस्कृतिं विना संस्कृतं तथैव निरर्थका यथा बीजं विना वृक्षम् । अधुनापर्यन्तं देशस्य कर्णधाराः वैदेशिकां संस्कृतिं त्यक्तुं नेच्छन्ति। विश्वस्य विविधासु संस्कृति - सभ्यतासु भारतीयसंस्कृतौ धर्मानुष्ठानं सुमहत् प्राधान्यं भजते स धर्माचरणोपदेशः सुरभारत्यां सुरक्षितः । आचारव्यवहारविषये भारतीयाः सर्वदा आदर्शप्रायाः तिष्ठन्ति ।
सत्यमिदम् -

**भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः ।**

अत्र स्थाने सर्वप्रथम् एतत् ज्ञायते किं नाम संस्कृतम् ? अस्य प्रश्नस्य समाधानमत्रोपस्थाप्यते। सामान्यतस्तु भाषा नाम व्यक्ता अर्थात् भावाभिव्यक्तये प्रयुक्तानां सार्थकशब्दानां समष्टिरेव भाषेति कथ्यते । भाष्यते व्यक्तरूपेण किञ्चिन्मनोगतम् अभिव्यज्यते इति भाषा ।

सकलसंसारे याः भाषाः सन्ति तासु भाषासु संस्कृतभाषा श्रेष्ठा गरिष्ठा परिपूर्णा च वर्तते । संस्कृतशब्दस्य निष्पत्तिः सम् उपसर्गपूर्वक-कृधातोः क्त प्रत्यये कृते संस्कृतशब्दस्य निष्पत्तिः जायते। अनेन कारणेन संस्कृतं परिष्कृतं परिशुद्धं व्याकरणादिदोषरहितं यत् तत् संस्कृतम् । प्राचीनैः ऋषिभिर्मुनिश्च भाषागतदोषपरिष्कारेण अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहारे आनीता सैव संस्कृतभाषा नाम्ना सम्बोध्यते प्रशस्यते आद्रीयते च ।

संस्कृतं संस्कृतिश्च एतयोः द्वयोः किं रहस्यं किमावश्यकम् ? इति जिज्ञासा उदेति यथा-

विश्वस्य मानवजगति दृष्टिपातेन यद् ज्ञायते, विश्वस्य सर्वेषु देशेषु यत्र - यत्र मानवाः निवसन्ति तत्रत्या एका संस्कृतिर्भवति । यथा मानवानामुत्सवपद्धति मानवानां मानसिकी बौद्धिकी शैक्षणकी च पद्धति या स्थिति तासां स्थितीनां आभ्यन्तररूपं संस्कृतिः भवति बाह्यरूपं सभ्यता च कथ्यते । तर्हि मानवसमाजस्य जन्मतः मृत्युपर्यन्तं या पद्धतिः भवति सा संस्कृतिः । सा संस्कृतिः कथमुद्भाव्यते कदा उपजायते कदा संस्कृतिः कथयितुं शक्यते ? । एतेषां प्रश्नानां निवारणाय ज्ञानाय च संस्कृतस्याध्ययम् आवश्यकं वर्तते ।

संस्कृतभाषा सम्बद्धा संस्कृतिः सा संस्कृतिः मधुरा भवति सा संस्कृतिः पूज्या भवति सा संस्कृतिः आदरणीया च भवति । कारणं हि मानवान् देवान् प्रति नयति संस्कृतिः सा भारतीया संस्कृतिः वर्तते ।

संस्कृतभाषा तु ज्ञानराशि मूला भाषा वर्तते, कारणं हि मनुष्याणां जातीनां वर्णानां समूहानां च वसुधैव कुटुम्बकम् एषा भावना संस्कृतभाषायाः संनिहिता वर्तते । सांस्कृतिकदृष्ट्या संस्कृतभाषा अनर्घा प्रेष्ठा च वर्तते । भारतस्य तु भाषैषा सांस्कृतिको निधिः । निखिलमपि सांस्कृतिकं वाङ्मयं संस्कृतमाश्रित्यैवावतिष्ठते । विश्वसंस्कृतिपरिज्ञानार्थमपि संस्कृतभाषा अपरिहार्या । तुलात्मकसंस्कृतिविचारे संस्कृतभाषैव साहाय्यमाचरति । संस्कृतिभाषाश्रयैव संस्कृतिः सुदुरपूर्ववर्तिषु ब्रह्मदेश - श्याम - यव - सुमात्रादि - द्वीपेषु प्रचचार । अमेरिका - यूरोपदेशस्य संस्कृतिषु अपि एतस्याः अक्षयः प्रभावः परिलक्ष्यते । धर्मार्थकाममोक्षात्मकपुरूषार्थचतुष्टयस्य साधनं संस्कृतवाङ्मयमेवास्ति ।

प्रागै ऐतिहासिकतत्वबोधाय संस्कृतमेवैकं शरणम् भारोपीय - संस्कृतेः प्राचीनतमरूपावगमाय संस्कृतं विहाय नान्या गतिः । संस्कृतवाङ्मयाश्रयेणैव पाश्चात्यपौरस्त्यसंस्कृत्योः समन्वयः सम्पर्कः संगतिश्चावगम्यते। भारतीयसंस्कृतेः विशुद्धज्ञानाय संस्कृतवाङ्मयमेवैकं साधनम् अस्ति । जैनबौद्धचार्वाकादि- संस्कृतयोऽपि संस्कृतभाषाश्रया एव ।

संस्कृतं राष्ट्रभाषा भवितुमर्हति पूर्वोक्तेन विवेचनेन स्फुटमेतत् प्रतीयते यत् सर्वा अपि भारतीयाभाषाः संस्कृतनिष्ठाः संस्कृतसंपृक्ताश्च सन्ति । समग्रभारतवर्षे निखिले च देशजवाङ्मये संस्कृतस्यैव प्राधान्यं प्रचुरप्रवृत्तित्वं च । नास्ति देशस्य कोऽपि भागो यत्र संस्कृतवाङ्मयं नाधीयते नावगम्यते न श्रूयते न चाद्रीयते च । नास्ति कापि भारतीयभाषा या संस्कृतवाङ्मयमुपेक्ष्य जीवितुं क्षमा । आर्यभाषाणां व्याकरणमपि संस्कृतभाषा व्याकरणाश्रयत्वं द्योतयते । सर्वास्वपि आर्यद्रविड-

परिवारभाषासु संस्कृतशब्दानां बाहुल्यमवलोक्यते । क्वचित् षष्टिशतं क्वचित् अशीतिप्रतिशतं संस्कृतशब्दप्रयोगाः प्रवर्तन्ते । भाषाणां तुलनात्मकाध्ययनेऽपि संस्कृतस्यैव प्राधान्यम् अवगम्यते । संस्कृतवाङ्मयं सम्यग् अनुशीलितं चेत् न तादृशी कापि अन्या भारतीया आर्यभाषा या स्वल्पेनैव कालेनाधिगन्तुं पार्येत ।

हिन्दी भाषा तु संस्कृतभाषा एव आत्मजा । सा सर्वथा मातृऋणात् उन्मुत्त्का भवितुं न पारयति । हिन्दीभाषायाः समग्रमपि काव्यशास्त्रं साहित्यं च संस्कृतभाषाश्रयि वर्तते ।

संस्कृतभाषायामस्माकं संस्कृतिः सुरक्षितास्ति अत एव अस्माकं दायित्त्वं वर्तते यत् न्यायं वयं प्राप्नुमः तं संरक्षितं कुर्मः परिपुष्टं च कुर्मः । यतो हि मनुष्याणां जीवने किमपेक्ष्यन्ते किं नापेक्ष्यन्ते अस्य सर्वस्य परिहारः ज्ञानदृष्टिः च अस्माकं संस्कृतेः निहिते वर्तते । संस्कृतसंयुक्ता च अस्माकं संस्कृतिः वर्तते । अनेन कारणेन उभयोः संरक्षण - पालन - अनुकरणं च आवश्यकमिति ।